# कथापात्रनिरूपणम् - शकुन्तला

कालिदासविरचिते अभिज्ञानशाकुन्तले नाटके विश्वामित्रमेनकयोः पुत्री शकुन्तला मुग्धनायिका भवति। एषा पितृभिः परित्यक्ता शकुन्तैः परिलालिता च भवति। प्रकृतिनन्दिनी सा कण्वाश्रमे उषित्वा वृक्षलतादीन् पक्षिमृगादीन् च भ्रातृस्नेहेन परिलालितवती। मृगयाविनोदार्थं वनं प्राप्तः राजा दुष्यन्तः शकुन्तलां दृष्ट्वा तस्यामनुरक्तो बभूव।

यद्यपि गान्धर्वविधिमनुसृत्य शकुन्तलां परिणीतवान् तथापि सः राज्यकार्यार्थं नगरं प्रत्यागच्छत्। दुष्यन्तविरहितां तां कण्वः पतिगृहं प्रेषयितुं निश्चितवान्। प्रियसखिविरहं आश्रमविरहं च तामत्यधिकं व्यथयति। तात कदा नु भूयस्तपोवनं प्रेक्षयिष्येति तस्याः वचनं तस्याः विरहतीव्रतां प्रकटयति।